# ॥ શ્રીવેંકટેશાષ્ટોત્તરશતનામસ્તોત્રમ્ ૪ ॥

.. shrIve.nkaTeshAShTottarashatanAmastotram 4 ..

sanskritdocuments.org

September 11, 2017

# .. shrIve.nkaTeshAShTottarashatanAmastotram 4 ..

# ॥ શ્રીવેંકટેશાષ્ટોત્તરશતનામસ્તોત્રમ્ ૪ ॥

## Sanskrit Document Information

Text title : veNkaTeshvarAShTottarashatanAmastotram 4

File name : venkatesha4.itx

Category : vishhnu, venkateshwara

Location : doc_vishhnu

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Description-comments : shrIvarAhapurANantargatam

Latest update : May 3, 2008

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

ઋષય ઊચુઃ ।
સૂત સર્વાર્થતત્ત્વજ્ઞ સર્વવેદાઙ્ગપારગ ।
યેનચારાધિતઃ સદ્યઃ શ્રીમદ્વેંકટનાયકઃ ॥ ૧॥

ભવત્યભીષ્ટસર્વાર્થપ્રદસ્તદ્બ્રૂહિ નો મુને ।
ઇતિ પૃષ્ટસ્તદા સૂતો ધ્યાત્વા સ્વાત્મનિ તત્ ક્ષણાત્ ॥

ઉવાચ મુનિશાર્દૂલ શ્રૂયતામિતિ વૈ મુનીન્ ॥ ૨॥

॥ શ્રીસૂત ઉવાચ॥

અસ્તિ કિંચિન્મહદ્ગોપ્યં ભગવત્પ્રિયકારકમ્ ।
પુરા શેષેણ કથિતં કપિલાય મહાત્મને ॥ ૩॥

નામ્નામષ્ટશતં પુણ્યં પવિત્રં પાપનાશનમ્ ।
આદાય હેમપદ્માનિ સ્વર્ણદીસંભવાનિ ચ ॥ ૪॥

બ્રહ્મા વૈ પૂર્વમભ્યર્ચ્ય શ્રીમદ્વેંકટનાયકમ્ ।
અષ્ટોત્તરશતૈર્દિવ્યૈર્નામભિર્મુનિપુષ્પકૈઃ ॥ ૫॥

સ્વાભીષ્ટં લબ્ધવાન્ બ્રહ્મા સર્વલોકપિતામહઃ ।
ભવદ્ભિરપિ પદ્મૈશ્ચ સમભ્યર્ચ્ય ચ નામતઃ ॥ ૬॥

તેષાં શેષનગાધીશો મનસો હ્લાદકારકઃ ।
નામ્નામષ્ટશતં પુણ્યં વેંકટાદ્રિનિવાસિનઃ ॥ ૭॥

આયુરારોગ્યદં પુંસાં ધનધાન્યસુખપ્રદમ્ ।
જ્ઞાનપ્રદં વિશેષેણ મહદૈશ્વર્યકારકમ્ ॥ ૮॥

અર્ચયેન્નામભિર્દિવ્યૈઃ વેંકટેશપદાંતિકૈઃ ।
નામ્નામષ્ટશતસ્યાસ્ય ઋષિર્બ્રહ્મા પ્રકીર્તિતઃ ॥ ૯॥

છંદોઽનુષ્ટુપ્ તથા દેવો વેંકટેશ ઉદાહૃતઃ ।
નીલગોક્ષીરસંભૂતો બીજમિત્યુચ્યતે બુધૈઃ ॥ ૧૦॥

શ્રીનિવાસસ્તથા શક્તિર્હૃદયં વેંકટાધિપઃ ।
વિનિયોગસ્તથાઽભીષ્ટસિદ્ધ્યર્થે વિનિગદ્યતે ॥ ૧૧॥

ૐ નમો વેંકટેશાય શેષાદ્રિનિલયાય ચ ।
વૃષદૃગ્ગોચરાયાથ વિષ્ણવે સતતં નમઃ ॥ ૧૨॥

સદંજનગિરીશાય વૃષાદ્રિપતયે નમઃ ।
મેરુપુત્રગિરીશાય સરસ્સ્વામિતટં જુષે ॥ ૧૩॥

કુમારકલ્પસેવ્યાય વજ્રદૃગ્વિષયાય ચ ।
સુવર્ચલાસુતાન્યસ્ત-સેનાપત્યકરાય ચ ॥ ૧૪॥

રામાય પદ્મનાભાય સદા વાયુસ્તુતાય ચ ।
ત્યક્તવૈકુણ્ટલોકાય ગુહ્યકુંજવિહારિણે ॥ ૧૫॥

હરિચંદનગોત્રેંદ્રસ્વામિને સતતં નમઃ ।
શંકરઽજનનેત્રાબ્જવિષયાય નમો નમઃ ॥ ૧૬॥

વસૂપરિચરિત્રાય કૃષ્ણાય સતતં નમઃ ।
અબ્ધિકન્યાપરિષ્વક્તવક્ષસે વેંકટાય ચ ॥ ૧૭॥

સનકાદિમહાયોગિપૂજિતાય નમો નમઃ ।
દેવજિત્પ્રમુખાનંતદૈત્યસંઘપ્રણાસિને ॥ ૧૮॥

શ્વેતદ્વીપે વસન્મુક્તપૂજિતાંઘ્રિયુગાય ચ ।
શેષપર્વતરૂપત્વપ્રશાસનવરાય ચ ॥ ૧૯॥ પ્રકાશનપરાય

સાનુસ્થાપિતતાર્ક્ષ્યાય તાર્ક્ષ્યાચલનિવાસિને ।
માયાગૂઢવિમાનાય ગરુડસ્કન્ધવાસિને ॥ ૨૦॥

અનંતશિરસે નિત્યમનંતાક્ષાય તે નમઃ ।
અનંતચરણાય શ્રીશૈલનિલયાય ચ ॥ ૨૧॥

દામોદરય તે નિત્યં નીલમેઘનિભાય ચ ।
બ્રહ્માદિદેવદૃષ્ટાય વિશ્વરૂપાય તે નમઃ ॥ ૨૨॥

વેંકટાગતસદ્ધેમવિમાનાંતર્ગતાય ચ ।
અગસ્ત્યાર્ચિતાશેષજનદૃગ્વિષયાય ચ ॥ ૨૩॥

વાસુદેવાય હરયે તીર્થપંચકવાસિને ।
વામદેવપ્રિયાયાથ જનકેષ્ટપ્રદાય ચ ॥ ૨૪॥

વાક્પતિબ્રહ્મધાત્રે ચ ચંદ્રલાવણ્યદાયિને ।
માર્કણ્ડેયમહાતીર્થજાતપુણ્યપ્રદાય ચ ॥ ૨૫॥

નારાયણનગેશાય બ્રહ્મકૢપ્તોત્સવાય ચ ।
શંકચક્રગદાપદ્મલસત્કરતલાય ચ ॥ ૨૬॥

દ્રવન્મૃગમદાસક્તવિગ્રહાય નમો નમઃ ।
કેશવાય નમસ્તુભ્યં નિત્યયૌવનમૂર્તયે ॥ ૨૭॥

અર્થિતાર્થપ્રદાત્રે ચ વિશ્વતોર્થૌઘહારિણે ।
તીર્થસ્વામિસરઃસ્નાતજનાભીષ્ટપ્રદાય ચ ॥ ૨૮॥

કુમારધારિકાસ્કન્દમહ્યશક્તિ-પ્રદાય ચ ।
જમદગ્નિસમદ્ભૂતપૌત્રિણે કૂર્મમૂર્તયે ॥ ૨૯॥

કિન્નરદ્વંદ્વશાપાંતપ્રદાત્રે માધવાય ચ ।
વૈખાનસમુનિશ્રેષ્ઠ-પૂજિતાય નમો નમઃ ॥ ૩૦॥

સિંહાચલનિવાસાય શ્રીમન્નારાયણાય ચ ।
સદ્ભક્તનીલકણ્ઠાય નૃસિંહાય નમો નમઃ ॥ ૩૧॥

કુમુદાક્ષગણશ્રેષ્ઠસેનાપત્યપ્રદાય ચ ।
દુર્મેધઃપ્રાણહર્ત્રે ચ વામનાય નમો નમઃ ॥ ૩૨॥

ક્ષત્રિયાન્તકરામાય મત્સ્યરૂપાય તે નમઃ ।
પાણ્ડવાઘપ્રહર્ત્રે ચ શ્રીધરાય નમો નમઃ ॥ ૩૩॥

ઉપત્યકાપ્રદેશસ્થશંકરધ્યાનમૂર્તયે ।
રુક્માબ્જસરસીકૂલલક્ષ્મીકૃતતપસ્વિને ॥ ૩૪॥

લસલ્લક્ષ્મીકરાંભોજદત્તકલ્હારકસ્રજે ।
શાલિગ્રામનિવાસાય શુકદૃગ્વિષયાય ચ ॥ ૩૫॥

નારાયણાર્થિતાશેષજનદૃગ્વિષયાય ચ ।
મૃગયારસિકાયાથ વૃષભાસુરહારિણે ॥ ૩૬॥

અંજનાગોત્રપતયે વૃષભાચલવાસિને ।
અંજનાસુતદાત્રે ચ માધવસ્યાઘહારિણે ॥ ૩૭॥

પ્રિયાઙ્ગપ્રિયકોલાય શ્વેતકોલવરાય ચ ।
નીલધેનુપયોધારાસેકદેહોદ્ભવાય ચ ॥ ૩૮ ।
સગરપ્રિયમિત્રાય ચોલપુત્રપ્રિયાય ચ ।

સુધર્મિણે સુચૈતન્યપ્રદાત્રે મધુઘાતિને ॥ ૩૯॥

કૃષ્ણાખ્યવિપ્રવેદાન્તદેશિકત્વ પ્રિયાય ચ ।
વરાહાચલનાથાય બલભદ્રાય તે નમઃ ॥ ૪૦॥

ત્રિવિક્રમાય મહતે હૃષીકેશાય તે નમઃ ।
અચ્યુતાય નમો નિત્યં નીલાદ્રિનિલયાય ચ ॥ ૪૧॥

નમઃ ક્ષીરાબ્ધિનાથાય વૈકુંઠાચલવાસિને ।
મુકુંદાય નમો નિત્યં અનંતાય નમો નમઃ ॥ ૪૨॥

વિરિંચિભ્યર્તિતાનીતસૌમ્યરૂપાય તે નમઃ ।
સુવર્ણમુખરીસ્નાતમનુજાભીષ્ટદાયિને ॥ ૪૩॥

હલાયુધજગત્તીર્થસમસ્તફલદાયિને ।
ગોવિન્દાય નમો નિત્યં શ્રીનિવાસાય તે નમઃ ॥ ૪૪॥

અષ્ટોત્તરશતં નામ્નાં ચતુર્થ્યા નમસાન્વિતમ્ ।
યઃ પઠેચ્છૃણુયાન્નિત્યં શ્રદ્ધાભક્તિસમન્વિતઃ ॥ ૪૫॥

વેંકટેશાભિધે યંત્રે વેંકટાદ્રિનિવાસિનઃ ।
અર્ચયન્નામભિસ્તસ્ય ફલમુક્તં પ્રસિધ્યતે ॥ ૪૬॥

અર્ચનાયાં વિશેષેણ ગ્રાહ્યમષ્ટોત્તરં શતમ્ ।
તસ્ય શ્રીવેંકટેશશ્ચ પ્રસન્નો ભવતિ ધ્રુવમ્ ॥ ૪૭॥

ગોપનીયમિદં સ્તોત્રં સર્વેષાં ન પ્રકાશયેત્ ।
શ્રદ્ધાભક્તિયુજામેવ દાપયેન્નામસંગ્રહમ્ ॥ ૪૮॥

ઇતિ શેષેણ કથિતં કપિલાય મહાત્મને ।
કપિલાખ્યમહાયોગિસકાશાત્તુ મયાશ્રુતમ્ ।
તદુક્તં ભવતામદ્ય સદ્યઃ પ્રીતિકરં હરેઃ ॥ ૪૯॥

॥ ઇતિ શ્રીવરાહપુરાણે શ્રીવેંકટેશાષ્ટોત્તરશતનામસ્તોત્રં સંપૂર્ણમ્ ॥

Encoded and proofread by
N. Balasubramanian bbalu at satyam.net.in

.. shrIve.nkaTeshAShTottarashatanAmastotram 4 ..

Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996

on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*